International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(5): 22-23
© 2016 IJSR
www.anantaajournal.com
Received: 08-07-2016
Accepted: 09-08-2016

**Pradeep Tiwary**
Sanskrit Deptt. Mithila Sanskrit Research Institute, Darbhanga, India

**Correspondence**
**Pradeep Tiwary**
Sanskrit Deptt. Mithila Sanskrit Research Institute, Darbhanga, India

# भाषायाः विभिन्न विमर्शाः

## प्रदीप तिवारी

भाषा सा अस्ति येन माध्यमेन व्यक्तिः चिन्तयति तथा स्व विचारान् अभिव्यंजयति।
'भाषा' शब्दस्य उत्पत्तिः भाष् धातुना अभवत् यस्य अर्थः अस्ति वदन् या कथनम्।
इत्थम् येन व्यक्तनम् भवति सा भाषा अस्ति। विभिन्न भाषा विदाः भाषायाः पृथक–पृथक परिभाषाः दत्तवन्तः, यः निम्नलिखितोस्ति।

**महर्षि पाणिनिना मतानुसारेण**– "व्यवत्त वाचा समुच्चारणे"।

**महर्षि पतंजलिनानुसारेण**
"व्यक्ता वाचि वॉणी येषां त इमे व्यक्त वाचः।"
अर्थात् भाषा सा साधना अस्ति यया मनुष्यः स्व विचारान् अन्यस्मिन् सम्यक रुपेण प्रकटितुम शक्नोति, तथा अन्यस्य विचारान् स्वयमेव स्पष्ट रूपेण ज्ञातुम शक्नोति।

**प्लेटोः मतानुसारेणः** विचारः तथा च भाषायाम् किंचितेव भेदोस्ति। विचारः आत्मायाः मूकः अथवा ध्वन्यात्मकं वार्तालापः वर्तते, परन्तु तदेव ओष्ठौ प्रकटनम् भवति तर्हि ताम भाषायाः संज्ञा ददति।

**हेनरी स्वीट मतानुसारंः** "Language may be depined as the expression of thonght by means of speech sound. [1]

**वेन्द्रिये मतानुसारंः** भाषा इति एक प्रकारकः संकेतः अस्ति। संकेतस्य आशयः तैः प्रतीकैः अस्ति यैः मानवः स्वविचारान् आमुखान् द्वितीयान् प्रकटयति। प्रतीकाः नैक प्रकारकाः भवनि। यथा– नेत्रग्राह्याः, कर्णग्राह्याः तथा स्पर्श ग्राह्याः। वस्तुतः भाषा दृष्ट्या कर्णग्राह्याः प्रतीकाः एव श्रेष्ठाः। [2]

**ब्लॉक ट्रेगरयोः अनुसारेण**
"A Language is a system of arbitary vocal sysmbols by means of which a social group cooperates."
"Language may be defined as an arbitrary system of vocal system by means of which human beings as members of a social group and participants in culture interact and communicate."

**Insyelopedia bretenica**
Language is a purely human and non-instinctine method of commuricating ideas, emotions and diesires by means of voluntarily produced symbols." saper

भाषायाः उत्पत्तिविषयिकी चर्चा अत्यन्त प्राचीन कालादेव भवति। तथा जनैः एतस्मिन् नैकेषां सिद्धान्तानां निरुपणम् कृतम्। तेषां सिद्धान्तानाम अनुसारेण अमुकप्रकारेण भाषायाः उत्पत्तिरभवत अर्थात् साक्षात् प्रादुर्भावं ग्रहीतुं यतन्ति। ते प्रत्यक्ष मार्गान्तर्गतमागच्छन्ति। भाषायाः आरम्भं यावत् गन्तुं एकः परोक्षमार्गोऽपि वर्तते। परोक्षमार्गे उत्पत्तौ दृष्टिं नपातयित्वा भाषायाः वर्तमानस्वरुपं अवलोकयते। तथा तस्य ऐतिहासिक, तथा तुलनात्मकाध्ययनादिना शनैः–शनैः वर्तमानतः भूतं प्रति गम्यते। अनेन भाषोत्पत्तौ तु प्रकाशः न गच्छति अपितु तस्य आरम्भिक स्वरुपमेव किंचिदनुभीयते। अत्र द्वयोरपि मार्गयोः वर्णनं निम्नलिखितं वर्तते–

**प्रत्यक्षमार्ग**

भाषोत्पत्ति सम्बन्धे प्राचीनतमविचाराः यूनानवासिभिः व्यक्तीकृताः सन्ति।[3] 18 तमे शते एतस्मिन् विषये अनेके भाषावैज्ञानिकाः तथा अन्य क्षेत्रीयाः विद्वांसः गहनतया (गम्भीरतया) विचारं कृतवन्तः। (द्रष्टव्यः–4 भाषाविज्ञानम् (भोलानाथ तिवारी) मध्ये पृष्ठ सङ्या– 23 प्र0– किताब पहलम्) एतेषु विद्वत्सु शोधकेषु–गियाम्बटिस्टा, ब्रासेस, कांडिलाक, रुर्सो तथा हर्डर प्रभृतीनां नामानि प्रमुखतया स्वीक्रियते। एतेष्वपि हर्डरस्य नाम विशेषोल्लेख्यः अस्ति। एतस्य भाषोत्पत्ति लेखेन "बर्लिन अकादमी" तः पुरस्कारः प्राप्तः पाúाात् हर्डरेणैव स्वस्य मतं महत्वहीनं इत्युक्तम्। 19 तमे शतके एतस्मिन् विषये विचारकाणां संङ्या इतोऽपि वर्धिता। तेषु न्वापर, ग्रिम, राये, डार्विन हम्बोल्ट, श्लाइखर अर्नेष्टरेनन, जेस्पर्सन, मैक्समूलर, गाईगर, स्टाइन्थल, स्वीट मार्टी स्पेंसर रेगनॉड तथा टेलर प्रभृतीनां नामोल्लेखनीयोऽस्ति। विंशतितये शतकेऽपि एतस्मिन् विषये कतिचित् विदुषैः अत्र विचारः प्रदर्शितः तेषु वुष्ट, डिलैगुना बर्नडशा, हेनिऽस्वाल्ड, रेवेज, जोहान्सन, हम्फरी, समरफेल्ट प्रभृतीनां नाम मुख्यतो ग्राह्यः एतेष्वपि रेवेजस्यतथा जोहान्सास्य सिद्धान्तः विशेषतः उल्लेख्यः अस्ति।

एवं प्रकारेण भाषोत्पत्तिसिद्धान्तस्य विभिन्नैः विदुषैः विचाराः प्रस्तुताः। तेषु द्वयोः मतानुसारं साक्षात् भाषोत्पत्तिरेवेतस्य सम्बन्धः। अन्येषां मतानुसारं विशेषतः अर्थध्वनेः सह एतस्य सम्बन्ध इति निरुपितः वर्तते।

**दैवी उत्पत्तेः सिद्धान्ताः** भाषाणां उत्पत्ति सम्बन्धे सर्वतः प्राचीनोऽयं मतः।[4] जनानां विश्वासः आसीत्। तथा किंचित् अद्यापि संसारस्यतथातस्य अनेकानेकवस्तूनां सदृशं एव भाषामपि ईश्वरः एव निर्मितवान् इति। भारतीय पण्डिताः वेदान् अपौरुषेयं इत्यामनन्ति। तेषां दृढ़विश्वासोऽत्र वर्तते यत्– संस्कृतभाषां ईश्वरः एव निर्मितवान्। तथा तस्यांमेव भाषायां वेदानां रचना अस्तिकृत। संस्कृत भाषां देवभाषाइति वचनेनापि[5] तेषामयमेव आशयः यत् ईश्वरः एवनिर्मितवान्। संस्कृतं तथातस्य व्याकरणस्य मूलाधारः पाणिनिः तस्य 14 (चतुर्दश) सूत्राणि शिव ढक्कायाः निस्सृतानि मन्यते। ईश्वर निर्मितत्वादेव पण्डिताः संस्कृत भाषां सर्वेषां भाषानां मूलं इति वदन्ति। "देवीं वाचमजनयन्त देवास्तां विश्वरुपाः पशवोवदन्ति"। इति बौद्धाः "पालि" भाषामपि इत्थमेव मूल भाषा इति वदन्ति। तथा चे यं भाषा अनादि कालतः प्रचलनति इति स्वीकुर्वन्ति।

जैनाः तु, संस्कृत पण्डितानां तथा बौद्धानां अपेक्षा ऽतोऽपि अग्रे सन्ति। तेषां मतानुसारं "अर्धमागधी" केवलं मनुष्याणां एव मूलभाषानास्ति अपितु सर्वेषां जीवनां मूल भाषास्ति। यदा महावीरस्वाम्यिः अस्यां भाषायां उपदेशं यच्छन्ति स्म तदा देवाः, मनुष्याः, पशु पक्षी वृक्षादयः सर्वेऽपि तस्य रसास्वादे प्रकुर्वन्ति स्म इति।

ईसाई तथा तेषु अपि प्रमुखतः कैथोलिकजनाः हिब्रू भाषा जगतः सर्वेषां भाषानां जननी इति स्वीकुर्वन्ति। तेषामनुसारं "हिब्रू" आदमं तथा हव्वां पूर्ण विकसित भाषा रुपेण भगवता प्रदत्ता। पúाात् तस्यानेक रुपं भूत्वा जगतः अनेक भाषायाः रुपेण सा विभक्ता अभवत्।

यवनाः "कुरानं" एवं "खुदा" (ईश्वरस्य) भाषा स्वीकुर्वन्ति। मिस्र देशेऽपि इत्थमेव तत्रत्य प्राचीन जनाः स्वस्य भाषां स्वीकुर्वन्ति स्म।

प्लेटो महोदयेन सर्वं वस्तुजातं तथा तस्य नाम प्राकृतिकं अथवा प्रकृति प्रदत्तं इत्युक्तम्। मतमयमपि दैवी उत्पत्तेः एव रुपमस्ति। एतस्यमतस्य प्रभावेण जनानां अयमपि यतं आसीत् यत्– मनुष्यः जन्मतः एव एकांभाषां ज्ञात्वा आगच्छति। तथा सैव भाषा ईश्वरस्य तथा प्राचीनतमा भाषास्ति।

एतस्यैव निर्णयं कर्त्तुम् मिस्रदेशस्य नृपः सैमेटिकसः बालकद्वयं जन्मान्तरमेव अन्यत्र स्थापितवान्। तयोः पार्श्वे गन्तुकानां किमपि वक्तुं निषेधः आसीत्। यदा तौ बालकौ वर्धितौ तदा तयोः मुखतः "वेकोस" इत्येव शब्दं निस्सृतं। रोटिका प्रदायकेन भृत्येण त्रुटचा तयोः पुरतः शब्दोऽयं उच्चारितः आसीत् "वेकोस" फ्रिजियन भाषायाः शब्दः अस्ति। एतस्य अर्थः "रोटिका" इति भवति। फ्रेडरिक द्वितीयः (1194–1250) तथा "अकबरबादशाहः (1556–1605) अपि एवं प्रकारकः प्रयोगः कृतवान्। अकबरस्य प्रयोगः सफलः आसीत्। फलस्वरुप बालकौ मूकौ अभवताम्।

अनेन प्रकारेण सत्योऽयमुद्गतः यत् बालकः गर्भतः काऽपि भाषा ज्ञात्वा नैवागच्छति अर्थात् ईश्वर प्रदत्ता कापि भाषा नास्ति।

**संदर्भ–सूची**


1. वैदिक साहित्य का इतिहास– डा0 कर्ण सिंह
2. Historical linguistics and indoaryan language- A.M. Chatarge.
3. Outlines of linguestic analysis- Bloch strager.
4. Introductory of linguistics - Robert hall